"अवारणीयं रिपुभिर्वारणीयं करं शुभः ।
हेरम्बस्य ससिन्दूरमर्षिं दूरमपच्छिदम् ॥")

वारत्नं, क्ली, चर्म्मबन्धनी । इति केचित् ॥

वारवधूः, स्त्री, (वाराणां जनसमूहानां बधूः ।) वारमुख्या । इति हेमचन्द्रः । ३ । १९७ ॥ (यथा, आर्य्यासप्तशत्याम् । ३२८ ॥
"निजगात्रनिर्व्विशेषस्थापितमपि सारमखिल-
मादाय ।
निर्मोकमिव भुजङ्गी मुञ्चति पुरुषञ्च वारवधूः ॥")

वारवाणः, पुं, क्ली, (वारं वारणीयं वाणं यस्मात् ।) कञ्चुकः । इत्यमरः । २ । ८ । ६३ ॥ (यथा, माघे । १५ । ८४ ।
"पीनकुचतटनिपीड़दल-
दरवारवाणसुरसा जिलिङ्गिरे ॥")

वारबुषा, स्त्री, (वारान् बालकान् पुष्णातीति । पुष् + कः । पृषोदरादित्वात् पस्य बः ।) कदली । इति शब्दरत्नावली ॥

वारमुख्या, स्त्री, (वारेषु वेश्यासमूहेषु मुख्या श्रेष्ठा ।) जनैः सत्कृता वेश्या । इत्यमरः । २ । ६ । १९ ॥ (यथा, भागवते । १ । ११ । २० ।
"वारमुख्याश्च शतशो यानैस्तद्दर्शनोत्सुकाः ॥")

वारयिता, पुं, (वारयति दुर्नीतेरिति । वृ + णिच् + तृच् ।) पतिः । इति हलायुधः ॥

वारला, स्त्री, (वारं लातीति । ला + कः ।) वरटा । हंसी । इति हेमचन्द्रः । ४ । ३९३ ॥

वारलीकः, पुं, वल्वजा । इति शब्दरत्नावली ॥ वायुइ इति ख्यातः ॥

वारवाणिः, पुं, (वारं शब्दसमूहं वणते इति । वण + इण् ।) वंशीवादकः । इति त्रिकाण्ड-शेषः ॥ उत्तमगायकः । इति शब्दरत्नावली ॥ धर्म्माध्यक्षः । संवत्सरः । इत्यजयपालः ॥ एत-न्मते पवर्गीयादिः ॥

वारवाणिः, स्त्री, (वारे अर्थदानावसरे वाणिः प्रियालापो यस्याः ।) वेश्या । इति त्रिकाण्ड-शेषः ॥

वारवाणी, स्त्री, (वारवाणि + पक्षे ङीष् ।) वार-मुख्या । इति शब्दरत्नावली ॥

वारविलासिनी, स्त्री, (वाराणां जनसमूहानां विलासिनी स्त्री । यद्वा, वारान् विलासयतीति । वि + लस + णिच् + णिनिः । ङीप् ।) वेश्या । इति शब्दरत्नावली ॥ (यथा, कथासरित्-सागरे । १२ । ७८ ।
"अस्तीह मथुरा नाम पुरी कंसारिजन्मभूः ।
तस्यां रूपणिकेत्यासीत् ख्याता वारविला-
सिनी ॥")

वारवृषा, स्त्री, (वारान् हस्तिसमूहान् वर्षतीति । वृष + कः । टाप् । हस्तिभक्ष्यत्वेनास्यास्तथा-त्वम् ।) कदली । इति शब्दरत्नावली ॥

वारसुन्दरी, स्त्री, (वाराणां नरसमूहानां सुन्दरी ।) वेश्या । इति हारावली । १४४ ॥

वारसेवा, स्त्री, (वारे अवसरे सेवा ।) वेश्यानां क्रमः । तासां गणः । इति जटाधरः ॥

वारस्त्री, स्त्री, (वाराणां जनसमूहानां स्त्री ।) वेश्या । इत्यमरः । २ । ६ । १९ ॥

वारांनिधिः, पुं, (वारां जलानां निधिः । अलुक् समासः ।) समुद्रः । इति शब्दरत्नावली ॥

वाराणसी, स्त्री, (वरणा च असी च । तयोर्नद्यो-रदूरे भवा । "अदूरभवश्च ।" ४ । २ । ७० । इत्यण् । ङीप् । पृषोदरादित्वात् साधुः : अस्या निरुक्तिर्यथा,—
"वरणासी च नद्यौ द्वे पुण्ये पापहरे उभे ।
तयोरन्तर्गता या तु सैषा वाराणसी स्मृता ॥")
मोक्षदपुरीविशेषः । बनारस् इति हिन्दी भाषा । तत्पर्य्यायः । वाराणसी २ काशी ३ शिवपुरी ४ । इति हेमचन्द्रः ॥ जित्वरी ५ तपःस्थली ६ वरणसी ७ तीर्थराजी ८ काशिका ९ । इति शब्दरत्नावली ॥ तस्या माहात्म्यं यथा,—

ईश्वर उवाच ।

"परं गुह्यतमं क्षेत्रं मम वाराणसी पुरी ।
सर्व्वेषामेव भूतानां संसारार्णवतारिणी ॥
तत्र भक्ता महादेवि ! मदीयं व्रतमाश्रिताः ।
निवसन्ति महात्मानः परं नियममास्थिताः ॥
उत्तमं सर्व्वतीर्थानां स्थानानामुत्तमञ्च यत् ।
ज्ञानानामुत्तमं ज्ञानं अविमुक्तपुरं मम ॥
स्थानान्तरं पवित्राणि तीर्थान्यायतनानि च ।
श्मशानसंस्थितान्येव दिव्यभूमिगतानि च ॥
भूर्लोके नैव संलग्नमन्तरीक्षे ममालयम् ।
अमुक्तास्तन्न पश्यन्ति मुक्ताः पश्यन्ति चेतसा ॥
श्मशानमेतद्विख्यातमविमुक्तमिति श्रुतम् ।
कालो भूत्वा जगदिदं संहराम्यत्र सुन्दरि ! ॥
देवीदं सर्व्वगुह्यानां स्थानं प्रियतरं मम ।
यद्भक्तास्तत्र गच्छन्ति मामेव प्रविशन्ति ते ॥
दत्तं जप्तं हुतं चेष्टं तपस्तप्तं कृतञ्च यत् ।
ध्यानमध्ययनं ज्ञानं सर्व्वं तत्राक्षयं भवेत् ॥
जन्मान्तरसहस्रेषु यत् पापं पूर्व्वसञ्चितम् ।
अविमुक्तं प्रविष्टस्य तत्सर्व्वं व्रजति क्षयम् ॥
ब्राह्मणाः क्षत्त्रिया वैश्याः शूद्रा ये वर्णसङ्कराः ।
स्त्रियो म्लेच्छाश्च ये चान्ये संकीर्णाः पाप-
योनयः ॥
कीटाः पिपीलिकाश्चैव ये चान्ये मृगपक्षिणः ।
कालेन निधनं प्राप्ताः अविमुक्ते वरानने ! ॥
चन्द्रार्द्धमौलयस्त्र्यक्षा महावृषभवाहनाः ।
शिवे मम पुरे देवि ! जायन्ते तत्र मानवाः ॥
नाविमुक्ते मृतः कश्चिन्नरकं याति किल्बिषी ।
ईश्वरानुगृहीता हि सर्व्वे यान्ति परां गतिम् ॥
मोक्षं सुदुर्ल्लभं मत्वा संसारञ्चातिभीषणम् ।
अश्मना चरणौ हत्वा वाराणस्यां वसेन्नरः ॥
दुर्ल्लभा तपसा चापि मृतस्य परमेश्वरि ! ।
यत्र तत्र विपन्नस्य गतिः संसारमोक्षणी ॥
प्रसादाज्जायते ह्येतन्मम शैलेन्द्रनन्दिनि ! ।
अप्रबुद्धा न पश्यन्ति मम मायाविमोहिताः ॥
अविमुक्तं न पश्यन्ति मूढ़ा ये तमसावृताः ।
विण्मूत्ररेतसां मध्ये तेषां वासः पुनः पुनः ॥
हन्यमानोऽपि यो विद्वान् वसेद्विघ्नशतैरपि ।
स याति परमं स्थानं यत्र गत्वा न शोचति ॥
जन्मसृत्युजरायुक्तं परं यान्ति शिवालयम् ।
अपुनर्मरणानां हि सा गतिर्मोक्षकाङ्क्षिणाम् ॥
यां प्राप्य कृतकृत्यः स्यादिति मन्यन्ति पण्डिताः ।
न दानैर्न तपोभिश्च न यज्ञैर्नापि विद्यया ॥
प्राप्यते मतिरुत्कृष्टा या विमुक्ते तु लभ्यते ।
नानावर्णा विवर्णाश्च चाण्डालाद्या जुगुप्सिताः ॥
किल्बिषैः पूर्णदेहा ये विशिष्टैः पातकैस्तथा ।
भेषजं परमं तेषामविमुक्तं विदुर्ब्बुधाः ॥
अविमुक्तं परं ज्ञानमविमुक्तं परं पदम् ।
अविमुक्तं परं तत्त्वमविमुक्तं परं शिवम् ॥
कृत्वा वै नैष्ठिकीं दीक्षामविमुक्ते वसन्ति ये ।
तेषां तत् परमं ज्ञानं ददाम्यन्ते परं पदम् ॥
प्रयागं नैमिषं पुण्यं श्रीशैलोऽथ हिमालयः ।
केदारं भद्रकर्णञ्च गया पुष्करमेव च ॥
कुरुक्षेत्रं रुद्रकोटिर्नर्म्मदा आम्रातकेश्वरम् ।
शालग्रामञ्च कुब्जाम्रं कोकामुखमनुत्तमम् ॥
प्रभासं विजयेशानं गोकर्णं भद्रकर्णकम् ।
एतानि पुण्यस्थानानि त्रैलोक्ये विश्रुतानि तु ॥
न यास्यन्ति परं मोक्षं वाराणस्यां यथा मृताः ।
वाराणस्यां विशेषेण गङ्गा त्रिपथगामिनी ॥
प्रविष्टा नाशयेत् पापं जन्मान्तरशतैः कृतम् ।
अन्यत्र सुलभा गङ्गा श्राद्धं दानं तपो जपः ॥
व्रतानि सर्व्वमेवैतत् वाराणस्यां सुदुर्लभम् ।
यजेत जुहुयान्नित्यं ददात्यर्च्चयतेऽमरान् ॥
वायुभक्षश्च सततं वाराणस्यां स्थितो नरः ।
यदि पापी यदि शठो यदि वा धार्म्मिको नरः ।
वाराणसीं समासाद्य पुनाति सकलं नरः ॥
वाराणस्यां महादेवं येऽर्च्चयन्ति स्तुवन्ति वै ।
सर्व्वपापविनिर्म्मुक्तास्ते विज्ञेया गणेश्वराः ॥
अन्यत्र योगज्ञानाभ्यां सन्न्यासादथ नान्यतः ।
प्राप्यते तत् परं स्थानं सहस्रेणैव जन्मनः ॥
ये भक्ता देवदेवेशं वाराणस्यां वसन्ति वै ।
ते विन्दन्ति परं मोक्षमेकेनैव तु जन्मना ॥
यत्र योगस्तथा ज्ञानं मुक्तिरेकेन जन्मना ।
अविमुक्तं तदासाद्य नान्यद्गच्छेत्तपोवनम् ॥
ज्ञानाज्ञानाभिनिष्ठानां परमानन्दमिच्छताम् ।
या गतिर्विहिता सुभ्रु साविमुक्ते मृतस्य तु ॥
यानि चैवाविमुक्तस्य देहे भुक्तानि कृत्स्नशः ।
पुरी वाराणसी तेभ्यः स्थानेभ्यो ह्यधिका शुभा ॥
यत्र साक्षान्महादेवो देहान्ते स्वयमीश्वरः ।
व्याचष्टे तारकं ब्रह्म तत्रैव ह्यविमुक्तके ॥
तत्तत् परतरं तत्त्वमविमुक्तमिति श्रुतम् ।
एकेन जन्मना देवि वाराणस्यां तदाप्नुयात् ॥
भ्रूमध्ये नाभिमध्ये च हृदये चैव मूर्द्धनि ।
यथाविमुक्तमादित्ये वाराणस्यां व्यवस्थितम् ।
वरणायास्तथा चास्या मध्ये वाराणसी पुरी ॥
तत्रैव संस्थितं भद्रं नित्यमेवाविमुक्तकम् ।
वाराणस्याः परं स्थानं न भूतं न भविष्यति ॥
यत्र नारायणो देवो महादेवाधिपीश्वरः ।
तत्र देवाः सगन्धर्व्वाः सयक्षोरगराक्षसाः ।